# संस्कृतम् (केन्द्रिकम्, कोड-सङ्ख्या - 322)

## आदर्श-प्रश्नपत्रम्

## कक्षा - द्वादशी (2026-27)

**अवधिः - होरात्रयम्** **अङ्कयोजना उत्तरसङ्केताश्च** **पूर्णाङ्काः - 80**

**अवधातव्यम् -**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निदर्शात्मकानि सन्ति। प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्तव्यः।** यथा अनुवादकार्ये पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि षड् वाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम्। **(अयं नियमः एकादश्यां कक्षायाम् अपि पालनीयः।)**
3. श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति। अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाचि-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति। तदर्थम् अङ्काः देयाः। यदि विद्यार्थिनः उत्तरलेखन-समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम्। अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः।

| | | |
|---|---|---|
| | **खण्डः - क**<br>**अपठितावबोधनम् - 10 अङ्काः** | |
| **1.** | **अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत -** | **10** |
| | **(अ) एकपदेन उत्तरत - केवलं प्रश्नद्वयम्** | **2×1=2** |
| | (i) वृक्षाः<br>(ii) वैदिककाले<br>(iii) प्राकृतिक-पर्यावरणस्य | |
| | **(आ) पूर्णवाक्येन उत्तरत - केवलं प्रश्नद्वयम्** | **2×2=4** |
| | (i) 'प्लास्टिक्' इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्तः अपि जनाः एतेषां प्रयोगं बाहुल्येन कुर्वन्ति।<br>(ii) यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव | |

| | | |
|---|---|---|
| | असम्भवं भविष्यति।<br>(iii) पर्यावरणप्रदूषकं धूमं क्षिपतां वाहनानाम् औद्योगिक-यन्त्रागाराणां सङ्ख्या निरन्तरं वर्धमाना अस्ति। | |
| | (इ) अनुच्छेदस्य समुचितं शीर्षकं लिखत।<br>पर्यावरणम्, प्रकृतिसुरक्षा।<br>अन्ये अपि शीर्षकाः भवितुम् अर्हन्ति। | 1×1=1 |
| | (ई) यथानिर्देशम् उत्तरत - | 3×1=3 |
| | (i) (ख) आविष्काराः<br>(ii) (घ) पोषकः<br>(iii) (ग) अनुभवन्ति | |
| | **खण्डः - ख**<br>**रचनात्मककार्यम् - 15 अङ्काः** | |
| 2. | भवान् प्रदीपः। स्वस्य कुशलतायाः विषये सूचयितुं मातरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखतु - | 10×½=5 |
| | (i) **व्यास-छात्रावासः**<br>शिमलातः,<br>तिथिः ____________<br>परमपूज्यमातः!<br>सादरं प्रणामाः।<br>अहम् अत्र कुशली तत्रापि कामये। भवत्याः पत्रं प्राप्य मनसि सन्तोषः (ii) **जातः**। मम भ्राता (iii) **इदानीं** स्वस्थः इति हर्षस्य विषयः। सः मम अध्ययनस्य (iv) **स्वास्थ्यस्य** च विषये चिन्तितः आसीत्। अहं पञ्चवादने (v) **उत्थाय** यथानिर्दिष्टं (vi) **व्यायामं** करोमि (vii) **तदनन्तरं** च पठामि। नववादने विद्यालयं (viii) **गच्छामि**। चतुर्वादने (ix) **विद्यालयात्** आगच्छामि। सप्तवादने गृहकार्यं करोमि। पितृमहाभागानां प्रणामाः कथनीयाः।<br>भवत्याः आज्ञापालकः (x) **पुत्रः**<br>प्रदीपः। | |
| 3. अ | अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशतितः त्रिंशच्छब्दपरिमितैः अनुच्छेदमेकं लिखत - | 5 |
| | अत्र छात्रेभ्यः संक्षिप्तवाक्यरचना अपेक्षिता वर्तते। केवलं वाक्यशुद्धिः द्रष्टव्या। **अस्य प्रश्नस्य प्रमुखम् उद्देश्यं वाक्यरचना भावप्रकटनं च अस्ति।** वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति। व्याकरणदृष्ट्या शुद्धतानिमित्तं स्वबुदध्या निर्धारणं करणीयम्। मञ्जूषायां | |

| | | |
|---|---|---|
| | प्रदत्ताः शब्दाः सहायतार्थं सन्ति। छात्रः तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति। छात्रः स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति। मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्यते। | |
| | **अथवा** | |
| आ | **अधः प्रदत्तं विषयम् आधृत्य पञ्चविंशतितः त्रिंशच्छब्दपरिमितैः अनुच्छेदमेकं लिखत -** | |
| | अयं विकल्पः सर्वेभ्यः अस्ति। छात्राः मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्तनं कृत्वा अपि वाक्यनिर्माणं कर्तुं शक्नुवन्ति। अतः अङ्काः देयाः। अस्य मूल्याङ्कनाय अन्ये नियमाः चित्रवर्णनस्य अनुगुणं पालनीयाः। | |
| 4. अ | **मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -** | 10×½=5 |
| | कस्मिंश्चिद् विशाले जनप्रदेशे कश्चन धनादि-ऐश्वर्य-विहीनः (i) **दरिद्रः** जनः प्रतिवसति स्म। सः भिक्षाटनेन (ii) **जीवनयापनं** करोति स्म। अथ कदाचित् सः पिष्टेन पूरितम् एकं (iii) **मृत्तिकाघटं** प्राप्नोत्। सः तं घटम् आनीय गृहे एकस्मिन् नागदन्ते स्थापितवान्। सः सदा तस्य घटस्य अधः उपविश्य घटमेव पश्यति स्म। एकदा रात्रौ सः (iv) **चिन्तितवान्** -"यदि प्रदेशे दुर्भिक्षः भवेत् तर्हि एतस्य अधिकं मूल्यं भवेत्। तदा अहम् एतस्य पिष्टपूरितस्य घटस्य (v) **विक्रयणं** कृत्वा तेन धनेन अजानां क्रयणं करिष्यामि। कालान्तरे तेन अजसमूहः भविष्यति। अजसमूहस्य विक्रयणं कृत्वा महिषीः ताः च विक्रीय अश्वान् क्रेष्यामि। अश्वान् अपि विक्रीय यथेष्टं (vi) **धनं** सम्पादयिष्यामि। तेन धनेन बृहतः भवनस्य निर्माणं कारयिष्यामि। तदा मां धनवन्तं ज्ञात्वा कश्चित् श्रेष्ठी आगत्य रूपवतीं (vii) **स्वकन्यां** मह्यं दास्यति। अनन्तरं मम पुत्रः भविष्यति। देवः इति तस्य नामकरणं करिष्यामि। अथ कदाचन अहं प्राङ्गणे (viii) **पुस्तकं** पठिष्यामि। यदा देवः जानुभ्यां चलन् मम (ix) **समीपम्** आगमिष्यति तदा तं बालं नेतुं स्वपत्नीम् आज्ञापयिष्यामि। यदि सा मम वचनं न श्रोष्यति, तर्हि अहं कोपेन (x) **पादप्रहारं** करिष्यामि।" इति चिन्तयन् सः पादप्रहारं कृतवान् एव। तेन प्रहारेण घटः पतितः भग्नः चाभवत्।<br>**अथवा** | |
| आ | **अधोलिखिते संवादे मञ्जूषायाः सहायतया रिक्तस्थानानि पूरयत -** | |
| | **महेशः** - मित्र! भवान् वार्षिकोत्सवाय विद्यालयं न आगच्छत्। अपि गृहे सर्वं कुशलम्?<br>**राममनोहरः** - (i) **आम् मित्र! गेहे सर्वं कुशलमेव।**<br>**महेशः** - तर्हि किमर्थं नागच्छत्?<br>**राममनोहरः** - (ii) **वयं गृहे न आस्म, सर्वेऽपि भ्रमणार्थं उज्जयिनीम् अगच्छाम।**<br>**माधवः** - अहो! उज्जयिनीं सर्वे परिवारजनाः अगच्छन्। बहूत्तमम्। किं किं दृष्टम्?<br>**राममनोहरः** - (iii)**सर्वप्रथमं तु शिप्रानद्यां स्नानं कृतं पश्चात् च वयं महाकालदर्शनम् अकुर्म।**<br>**माधवः** - उज्जयिन्याः विषये बहुधा श्रुतम् अस्ति। किम् अन्वभवत् तत्र भवान्?<br>**राममनोहरः** - आनन्दप्रदं नगरं तत्, सर्वेऽपि तत्र चिन्तारहिताः हरहरमहादेव जयमहाकाल | |

| | | |
|---|---|---|
| | इति वदन्तः सर्वत्र व्रजन्ति।<br>**माधवः** - अहो! अद्भुतं खलु तद् दृश्यम्। किं प्रातःकालस्य भस्मार्त्याः दृश्यम् अवालोकयत्?<br>**राममनोहरः** - (iv) **आम्, अद्भुतं दृश्यं भवति तत्र यदा भस्मारती भवति तदा जनाः मन्दिरपरिसरे उपविश्य आनन्दरताः भवन्ति।**<br>**माधवः** - सत्यं वदति, अहम् अत्र विवरणं श्रुत्वैव आनन्दितः भवामि।<br>**राममनोहरः** - भवान् अपि कदापि गच्छतु यतोहि वस्तुतः दर्शनीयं स्थलं तत्।<br>**माधवः** - (v) **आम् मित्र! परिवारसदस्यैः सह विमर्शं कृत्वा योजनां करिष्यामि। धन्यवादः।**<br>**राममनोहरः** - स्वागतम्, पुनर्मिलामः महादेव! | |
| | | |
| | **खण्डः - ग**<br>**अनुप्रयुक्तव्याकरणम्** 20 **अङ्काः** | |
| 5. अ | अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत- | 4×1=4 |
| | (क) आचार्याय **प्रियं धनमा**हृत्य प्रजतन्तुं मा व्यव्छेत्सीः।<br>(ख) **तनुवाक् + विभवः** अपि सन् रघूणाम् अन्वयं वक्ष्ये।<br>(ग) एकशरीर - सङ्क्षिप्ता पृथिवी **रक्षितवव्या + इति**।<br>(घ) क एष मामनुत्तरन् **मुमूर्षुस्समायाति**।<br>अथवा | |
| आ | अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत- | 4×1=4 |
| | (क) अपेक्षया रूपवतां हि विद्या मानं **लभन्ते + अतितरां** जगत्याम्।<br>(ख) **सन्तुष्टो राजा** मुञ्जः भोजं निजसिंहासने निवेशयेत्।<br>(ग) जाने ते अभिरुचिम् **अध्ययन + अध्यापनयोः** च।<br>(घ) दैवी **सम्पद्विमोक्षाय** निबन्धायासुरी मता। | |
| 6. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत - | 4×1=4 |
| | (i) (ख) प्रज्ञासदृशागमः<br>(ii) (ग) वाष्पेण सहितम्<br>(iii) (क) कर्मविचिकित्सा<br>(iv) (घ) कामक्रोधलोभान् | |
| 7. | अधोलिखित-वाक्येषु रेखाङ्कितपदेषु प्रकृतिप्रत्ययौ संयोज्य विभज्य वा समुचितं रूपं प्रदत्तविकल्पेभ्यः चिनुत - | 4×1=4 |
| | (i) (घ) निर्+ईक्ष्+शानच्<br>(ii) (ग) अप्रभुत्वम्<br>(iii) (ख) बलवान् | |

| | | |
|---|---|---|
| | (iv) (क) परि + त्राण् + तव्यत् | |
| 8. | समुचितं विभक्तियुक्तं पदं प्रदत्तविकल्पेभ्यः चित्वा रिक्तस्थानपूर्तिं कृत्वा लिखत - | 4×1=4 |
| | (i) ते आत्मसम्भाविताः स्तब्धाः **(घ) नामयज्ञैः** अविधिपूर्वकं यजन्ते।<br>(ii) कुलगुरुतुम्बरुमहाभागैः तु **(ख) गन्धर्वराजाय** अन्यदेव सूचितम्।<br>(iii) **(ग) दीपस्य** समीपम् आगत्य दौवारिकः उवाच।<br>(iv) राजा दिलीपः **(घ) प्रज्ञया** सदृशागमः आसीत्। | |
| 9. अ | वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं लिखत- | 4×1=4 |
| | **राघवेन्द्रः** - भोः मानव! (i) **राधया** अधुना किं क्रियते?<br>**मानवः** – किं त्वम् न जानासि? सा परीक्षायै (ii) **सिद्धताम्** करोति।<br>**राघवेन्द्रः** - तया क्रीडनाय कदा (iii) **आगमिष्यते**?<br>**मानवः** - निश्चयेन अध्ययनं समाप्य एव (iv) **सा** क्रीडनाय आगमिष्यति।<br>अथवा | |
| आ | वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितानि वाक्यानि लिखत- | |
| | (i) तेन विद्यालयः **गम्यते**।<br>(ii) **त्वं** श्रीमद्भगवद्गीतां जानासि?<br>(iii) पिता सर्वान् **पुत्रान्** लालयति।<br>(iv) क्रीडकैः ध्यानेन **क्रीड्यते**। | |
| | **खण्डः - घ भागः - I**<br>**पठितांशावबोधनम् - 25 अङ्काः** | |
| | | |
| 10. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (क) पुत्रम्<br>(ख) मुञ्जाय<br>(ग) सिन्धुल-संज्ञः | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (क) राजा आत्मनः जरां ज्ञात्वा विचारयामास - यद्यहं राज्यलक्ष्मीभारधारणसमर्थं सहोदरमपहाय राज्यं पुत्राय प्रयच्छामि, तदा लोकापवादः। अथ वा बालं मे पुत्रं मुञ्जो राज्यलोभाद्विषादिना मारयिष्यति तदा दत्तमपि राज्यं वृथा।<br>(ख) राज्ञः वार्धक्ये भोज इति पुत्रः समजनि।<br>(ग) पुत्रहानिर्वंशोच्छेदश्च इति विचार्य राज्यं मुञ्जाय अयच्छत्। | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (क) पिता/राजा | |

| | | |
|---|---|---|
| | (ख) मुमोच<br>अथवा | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(क) पुत्राय/भोजाय<br>(ख) संवीक्ष्य | |
| 11. | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (क) सुमहान्<br>(ख) क्रमेलकः<br>(ग) दोषेषु | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (क) क्रमेलकः केलिवनं प्रविश्य कण्टकजालं निरीक्षते ।<br>(ख) पद्ये सूक्तिरसं कर्णामृत-सदृशं प्रोक्तम्।<br>(ग) कर्णामृतं सुक्तिरसं विमुच्य खलानां यत्नः दोषेषु भवति। | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (क) सुमहान्<br>(ख) दोषेषु<br>अथवा | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(क) क्रमेलकः<br>(ख) विमुच्य | |
| 12. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् यथानिर्देशं संस्कृतेन उत्तरत - | 5 |
| | I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×½=1 |
| | (क) वल्कलान्<br>(ख) सीता<br>(ग) रामेण | |
| | II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) | 2×1=2 |
| | (क) रामेण वने वस्तव्यम्।<br>(ख) सीता श्वश्रूश्वशुरशुश्रूषानिमित्तं देवतानां प्रणामं करोति।<br>(ग) भवान् (लक्ष्मणः) मोहम् उपगतः। | |
| | III. (अ) निर्देशानुसारम् उत्तरत - | 2×1=2 |
| | (क) सीतायै | |

| | | |
|---|---|---|
| | (ख) अहम् (रामः)<br>अथवा | |
| | (आ) निर्देशानुसारम् उत्तरत -<br>(क) देवतानाम्<br>(ख) सीतायाः | |
| 13. अ | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत - | 3×1=3 |
| | **भावार्थः** - येन प्रकारेण (i) **क्षीरसागरात्** चन्द्रमा उत्पन्नः अभवत् तथा एव तस्य (ii) **वैवस्वतमनोः** वंशे तस्य अपेक्षया अपि (iii) **कान्तिमान्** निर्मलतरः राजसु चन्द्रः इव तेजस्वी राजा दिलीपः अभवत् (जन्म लब्धवान्)।<br>अथवा | |
| आ | प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत- | |
| | **(i) सूक्तिरसं विमुच्य दोषेषु यत्नः सुमहान् खलानाम्।**<br>(ख) दुष्टानां प्रयासः सुवचनं त्यक्त्वा दोषेषु/व्यसनेषु भवति।<br>**(ii) युधिष्ठिरस्य एषा एव चिन्तनसरणिः।**<br>(क) ज्येष्ठपाण्डुपुत्रस्य ईदृशी एव विचारधारा।<br>**(iii) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि।**<br>(ग) यानि दोषरहितानि अनिन्द्यानि च कार्याणि सन्ति तानि करणीयानि। | |
| 14. | अधोलिखित- श्लोकस्य प्रदत्ते अन्वये रिक्तस्थानपूर्तिं कुरुत - | 3×1=3 |
| | **अन्वयः** - तावत् एव (i) **पार्थिवस्य** वनगमन-निवृत्तिः, मम पितृपरवत्ता सः एव (ii) **बालभावः**, नवनृपति-विमर्शे प्रजानां शङ्का न अस्ति, अथ च मे भ्रातरः (iii) **परिभोगैः** वञ्चिताः न (भविष्यन्ति)। | |
| 15. अ | 'क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत - | 4×1=4 |
| | **'क' स्तम्भः** — **'ख' स्तम्भः**<br>(1) प्रजानामेव भूत्यर्थम् — (ख) स ताभ्यो बलिमग्रहीत्।<br>(2) वेदम् अनूच्याचार्यः — (क) अन्तेवासिनमनुशास्ति।<br>(3) अजीर्णे भेषजं वारि — (घ) जीर्णे वारि बलप्रदम्।<br>(4) आचार्येतिपादं प्राप्य — (ग) शिष्येभ्यः जीवनकलां शिक्षयिष्यामि।<br>अथवा | |
| आ | अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् उत्तरं चित्वा लिखत - | |
| | (क) **ऐश्वर्याय** न प्रमदिव्यम्।<br>(ख) फले कस्मिन् **कामना** तस्या येनाकार्यं करिष्यति।<br>(ग) राजा ब्राह्मणं सम्प्रेष्य **रात्रौ** शयनमासाद्य व्यचिन्तयत्। | |

| | | |
|---|---|---|
| | (घ) केलिवनं प्रविश्य **उष्ट्रः** कण्टकजालं निरीक्षते। | |
| | **खण्डः - घ भागः - ii**<br>**सामान्यसंस्कृतसाहित्यपरिचयः 10 अङ्काः** | |
| 16. | अधोलिखित-प्रश्नानाम् उत्तराणि लिखत- (केवलं प्रश्नत्रयम्) | 3×1=3 |
| | (i) 'शिक्षावल्याः' **अनुशासनम्** इति पाठः सङ्कलितः।<br>(ii) 'प्रजानुरञ्जको नृपः' इति पाठः **रघुवंश**महाकाव्यात् सङ्कलितः?<br>(iii) 'शिवराजविजयः' इत्यस्य उपन्यासस्य लेखकः **पं. अम्बिकादत्तव्यासः**।<br>(iv) 'कार्याकार्यव्यवस्थितिः' इत्यस्य पाठस्य सन्दर्भग्रन्थः **श्रीमद्भगवद्गीता**। | |
| 17. | मञ्जूषायाः समुचितं पदं चित्वा रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) | 3×1=3 |
| | (i) कालिदासेन रचितं खण्डकाव्यम् **मेघदूतम्** अस्ति।<br>(ii) **नलचम्पू** दमयन्तीकथा अपि कथ्यते।<br>(iii) **महाकाव्यस्य** सन्दर्भे 'गद्यं कवीनां निकषं वदन्ति' इति उक्तिः प्रसिद्धा।<br>(iv) दैवीयोदात्तगुणोपेतः उच्चकुलीयः क्षत्रियः **गद्यरचनायाः** नायकः भवति। | |
| 18. | समुचितं मेलयित्वा लिखत - | 4×1=4 |
| | **भाग क** — **भाग ख**<br>(i) मृच्छकटिकम् — (ख) शूद्रकः<br>(ii) राजनैतिकनाटकम् — (क) मुद्राराक्षसम्<br>(iii) महाभारताधारितम् — (घ) वेणीसंहारः<br>(iv) मालविाग्निमित्रम् — (ग) कालिदासः | |

--------00000-------